प्रथमः अध्यायः

# विविधतायाः अवबोधः



स्वकक्षायां सर्वत्र दृष्टिपातं कुर्वन्तु। किं कापि एतादृशी सहयोगिनी अस्ति या प्रत्यक्षतः भवत्सदृशा भवेत्? अस्मिन् पाठे भवती पठिष्यति यत् जनाः विविधेषु विषयेषु परस्परं भिन्नाः भवन्ति। ते न केवलं पृथग् भवन्ति अपितु ते विभिन्नेभ्यः क्षेत्रेभ्यः अपि सम्बद्धाः आगच्छन्ति। तेषां धर्मः वासादिव्यवस्था अन्नपानादिकं भाषा उत्सवादयः अपि पृथग्भवन्ति। एताः भिन्नताः अस्माकं जीवने रोचकतां समृद्धिं च आनयन्ति।

एतासां भिन्नतानां कारणतः एव भारते विविधता अस्ति। विविधता एकता च कथम् अस्माकं जीवनम् उत्कृष्टं करोति? भारतम् एतावद्विविधतासम्पन्नं राष्ट्रं कथं जातम्? किं सर्वविधाः विभिन्नताः विविधतायाः एव भागभूताः भवन्ति? चलाम, कानिचन उत्तराणि प्राप्तुं वयम् एतं पाठं पठामः।

भवत्याः समवयोभि बालैः उपरि प्रदत्त-चित्राणि रचितानि सन्ति। रिक्तमञ्जूषायां भवती स्वचित्रं रचयतु। किं भवत्याः चित्रम् अन्यैः त्रिभिः चित्रैः समानमेव अस्ति? एतद्भवितुं शक्नोति यत् भवत्याः चित्रम् एतेभ्यः त्रिभ्यः चित्रेभ्यः बहुभिन्नं स्यात् यथा एतानि त्रीणि चित्राणि अपि परस्परम् अन्योऽन्येभ्यः समानतां न भजन्ते। इत्थम् एतस्मात् कारणात् अस्ति यतो हि अस्माकं सर्वेषां चित्रकलायाः प्रकारः पृथक्-पृथग् भवति। यथा अस्माकं चित्रकलायां भिन्नता वर्तते तेनैव प्रकारेण अस्माकं वर्णस्य चयनादिषु खाद्यादिषु च अपि भिन्नता अस्ति।

स्वस्य विषये निम्नलिखितसूचनां यच्छन्तु-

- बहिर्गमनस्य समये अहं _______________ धर्तुमिच्छामि।
- अहं गृहे________________________ वार्तां करोमि।
- मम रुचिकरक्रीडा _______________ अस्ति।
- अहं_________ विषये पुस्तकानि पठितुमिच्छामि।

स्वस्याः अध्यापिकायाः साहाय्येन जानातु यत् भवतीषु कतीनां सखीनाम् उत्तराणि समानानि सन्ति । किं कक्षायां काचित् तादृशी सखी अपि अस्ति यस्याः सूची प्रत्यक्षतः भवत्याः सूच्याः इव वर्तते ? प्रायेण न स्यात्। किन्तु एवं भवितुम् अर्हति यत् कासाञ्चित् सखीनां कानिचन उत्तराणि भवत्याः उत्तरैः समानानि भविष्यन्ति । कतिभ्यः सखिभ्यः समान-पुस्तकानां पठनं रोचते? भवत्याः कक्षायाः विद्यार्थिनः आहत्य कतिभिः भाषाभिः वदन्ति ? एतस्मात् भवती ऊहां कृतवती स्यात् यत् बहुषु विषयेषु भवती स्वसखी इव अस्ति तथा च केषुचित् विषयेषु ताभ्यः पृथक् अस्ति।

**मैत्रीसम्पादनम्**

किं तादृशेन मनुष्येण सह मैत्रीसम्पादनं भवत्याः कृते सरलं भविष्यति यः भवत्याः सर्वथा भिन्ना अस्ति? अधोलिखितां कथां पठतु अपि च एतस्मिन् विषये चिन्तयतु।

अहम् एतं विषयम् परिहासरूपेण स्वीकृतवान् । परिहासः तस्मै जीर्णशीर्णवस्त्रधारिणे बालकाय आसीत् यः जनपथस्य सम्मर्दयुक्ते मार्गे चतुष्पथे रक्तसङ्केतदीपे वार्त्तापत्राणि विक्रीणीते स्म । अहं यदा ततः द्विचक्रिकया गच्छामि स्म सः आङ्गलभाषायाः वार्त्तापत्रं हस्ते उत्तोलयन् माम् अनुधावति स्म तथा च तस्य दिनस्य मुख्यवार्ताः आङ्गल-हिन्दीशब्दयोः मिश्रितरूपेण उच्चैः श्रावयति स्म । अस्मिन् पर्याये अहं पदमार्गस्य आश्रयं स्वीकृत्य स्थितवान् तथा च तस्मात् हिन्द्याः वार्त्तापत्रं



याचितवान्। तस्य मुखम् उद्घटितम् एव अभवत्। सः पृष्टवान् "एतस्य अयमर्थः यत् भवान् हिन्दीभाषां जानाति ?"

"निश्चयेन" अहं वार्त्तापत्रस्य धनं यच्छन् उक्तवान्।

"किमर्थम्? भवान् किं चिन्तितवान्?" सः स्थितवान् । "परन्तु भवान् तु आङ्गलीयः इव प्रतिभाति । इत्युक्ते भवान् हिन्दीभाषां पठितुमपि शक्नोति?"

"आम् ! निश्चयेन पठितुं शक्नोमि"। अस्मिन् पर्याये अहम् अधैर्येण उक्तवान्। "अहं हिन्दीं वक्तुं शक्नोमि

पठितुं शक्नोमि अपि च लेखितुम् अपि शक्नोमि। अहं विद्यालये अन्यैः विषयैः (सब्जेक्ट) सार्धं हिन्दीम् अपि पठितवान् अस्मि"। " विषयः" इति सः पृष्टवान्। अधुना पर्यन्तं यः विद्यालयं न गतवान् तम् अहं कथं बोधयानि यत् विषयः (सब्जेक्ट) इति किं भवति।" तत् किमपि भवति..." इति अहं प्रारब्धवान् एव आसम् यत् सङ्केतदीपः हरितवर्णीयः जातः तथा च मम पृष्ठतः वाहनानां कोलाहलः शतगुणितः जातः। अहमपि आत्मानं वाहनसम्मर्देन सह सारितवान्।

अग्रिमे दिने पुनः सः तत्र आसीत्। सः स्मयमानः मह्यं हिन्द्याः वार्तापत्रं यच्छन् उक्तवान् भ्रातः! भवतां वार्तापत्रम्। अधुना वदतु विषयः (सब्जेक्ट) इति किं वस्तु भवति ? आङ्गलभाषायाः अयं शब्दः तस्य मुखे विचित्रं प्रतिभाति स्म। इत्थमनुभूतं यत् आङ्गलभाषायां सब्जेक्ट शब्दस्य यः अपरः अर्थः अस्ति "प्रजा" इति तस्मिन्नर्थे सः तस्य प्रयोगं करोति।

"ओह, एतत् पठनलेखनसम्बद्धम् अस्ति" इति मया उक्तम्। एतदनन्तरं यतो हि सङ्केतदीपः रक्तवर्णीयः जातः आसीत् अतः अहं पृष्टवान्, "भवान् कदाचित् विद्यालयं गतवान् अस्ति?" "नैव, कदापि न," सः उत्तरं दत्तवान्। पुनः वार्ताप्रसङ्गे सः गर्वेण उक्तवान् "अहं यदा एतावान् उन्नतः आसम् तदारभ्य मया कार्यं कर्तुं प्रारब्धम्"। सः आत्मानं मम द्विचक्रिकायाः आसनेन मापितवान्। "पूर्वं मम अम्बा मया सह आगच्छति स्म,परन्तु अधुना अहम् एकाकी एव कर्तुं पारयामि"।

"अधुना भवतः माता कुत्र अस्ति" ? अहं पृष्टवान्। परन्तु तावत्पर्यन्तं सङ्केतदीपः हरितवर्णीयः जातः अपि च अहं चलितुम् आरब्धवान्। अहं तं पृष्ठतः किमपि वदन्तं श्रुतवान् "सा मेरठे अस्ति अपि च तया सार्धं...."। अन्यत्सर्वं वाहनकोलाहले निमग्नम्।

"मम नाम समीरः अस्ति" सः अग्रिमे दिने उक्तवान् तथा च लज्जाभावेन मम नाम पृष्टवान्, "भवतः नाम?" इदं तु आश्चर्योत्पादकं तथ्यम् आसीत्। मम द्विचक्रिका स्खलिता। "मम नाम अपि समीरः अस्ति" अहम् उक्तवान्। "किम् ? सहसा तस्य नेत्रे भासिते जाते। "आम्" अहं हसन् उक्तवान्। "भवान् जानाति यत् समीरस्य अर्थः अस्ति – वायुः,पवनः। अपि च पवनपुत्रः कः अस्ति जानाति खलु?.हनुमान्!"

तर्हि अद्यारभ्य प्रथमः समीरः भवान् अस्ति तथा च द्वितीयः समीरः अहम् अस्मि" इति सः प्रसन्नभावेन उक्तवान्। "आम्! सम्यगस्ति" अहम् उत्तरं उक्तवान् तथा च स्वहस्तं पुरतः कृतवान्। " हस्तमेलनं करोतु द्वितीय-समीर"!

तस्य लघुहस्तः मम हस्ते लघुचटकावत् समाहितः। अहं द्विचक्रिकां चालयित्वा अग्रे प्रस्थितवान् आसम् परन्तु तस्य हस्तस्य औष्ण्यम् अधुना यावत् अनुभूयते स्म।

अग्रिमे दिवसे तस्य मुखे तस्य चिरपरिचितस्मितः न आसीत्। "मेरठे महती समस्या जाता अस्ति" सः उक्तवान्। तत्र परस्परकलहे बहवः जनाः मृताः। अहं मुख्यवार्तापत्रस्य मुख्यसमाचारान् दृष्टवान्। स्थूलाक्षरेषु लिखितमासीत्-साम्प्रदायिकोपद्रवाः। "परन्तु समीर...." अहं वक्तुम्

प्रथमद्वितीययोः समीरयोः मध्ये काश्चन तिस्रः भिन्नताः लिखन्तु।

किम् एताः भिन्नताः तयोः पारस्परिकमैत्र्यां बाधाः जनितवत्यः।

आरब्धवानेव आसम् । “अहं मुस्लिमसमीरः अस्मि” सः उक्तवान् । “अपि च मम सर्वे जनाः मेरठे सन्ति । तस्य नेत्रे सजले जाते । यदा अहं तस्य स्कन्धे हस्तं स्थापितवान् सः दृष्टिम् उपरि न उन्नीतवान् ।

अग्रिमे दिने सः चतुष्पथे न आसीत् । न च तस्मात् अग्रिमे दिने सः तत्र दृष्टः, ततः अग्रे अपि सः पुनः कदापि तत्र न दृष्टः । आङ्ग्लहिन्द्योः किमपि वार्तापत्रं समीरविषये मां सूचयितुं न शक्नोति यत् समीर-द्वितीयः कुत्र गतवान् अस्ति ।

(पौउली-सेनगुप्तायाः कथा-द-लाइट्स चेंजड इत्यस्मिन् आधारिता)

यथा प्रथमः समीरः आङ्ग्लभाषां सम्यग् जानाति तथा एव च द्वितीयः समीरः हिन्दीं सम्यक् जानाति । यद्यपि द्वयोः भाषा पृथक् अस्ति तथापि द्वौ परस्परं वार्तां कर्तुं शक्तवन्तौ । तौ एतदर्थं प्रयासं कृतवन्तौ यतोहि तयोः कृते वार्तालापः महत्त्वपूर्णः आसीत् । प्रथमसमीरस्य द्वितीयसमीरस्य च पृष्ठभूमयः अपि पृथक्-पृथक् सन्ति । यथा प्रथमः समीरः हिन्दुः अस्ति तथैव अपरः समीरः यवनः



अस्ति । द्वयोः मध्ये मैत्री जाता यतोहि द्वौ अपि मित्रतां कर्तुम् इच्छतः स्म । अन्नपानस्य वेशभूषायाः धर्मभाषादीनाम् एताः भिन्नताः विविधतायाः पक्षाः सन्ति ।

स्वस्य विविधधार्मिकाणां सांस्कृतिकानां पृष्ठभूमीनाम् अतिरिक्तं प्रथमस्य समीरस्य द्वितीयसमीरस्य च मध्ये अन्यविषयेषु अपि परस्परं भिन्नता आसीत् । उदाहरणार्थं प्रथमः समीरः विद्यालये अध्ययनं कृतवान् अपरञ्च द्वितीयः समीरः वार्तापत्रस्य विक्रयणं करोति स्म । द्वितीयः समीरः विद्यालयं गन्तुम् अवसरमेव न प्राप्तवान् । भवद्भिः सम्भवतः स्वक्षेत्रे एतादृशाः बहवः जनाः दृष्टाः स्युः । ये निर्धनाः सन्ति येषां भोजन-वस्त्र-गृहसम्बन्ध्यावश्यकताः अपि पूर्तिं न गच्छन्ति । इदम् अन्तरं तस्मात् अन्तरात् पृथगस्ति यस्य विषये वयं पूर्वं पठितवन्तः । इदं विविधतायाः रूपं नास्ति परन्तु असमानता अस्ति । असमानता नाम केषाञ्चित् जनानां पार्श्वे न अवसराः सन्ति न भूमिः अस्ति न च धनसदृशानि संसाधनानि एव सन्ति यथा अपरेषां जनानां पार्श्वे सन्ति । अतः निर्धनता सम्पन्नता च विविधतायाः रूपाणि न सन्ति । इयं जनानां मध्ये विद्यमाना असमानता वर्तते ।

जातिव्यवस्था असमानतायाः इतोऽपि किञ्चन एकम् उदाहरणमस्ति । एतस्यां व्यवस्थायां समाजः पृथक्-पृथक्-समूहेषु विभक्तः । एतस्य

तेषाम् उत्सवानां सूचीं कुर्वन्तु प्रायः येषाम् उत्सवानाम् आचरणं प्रथमः समीरः द्वितीयः समीरः च इति उभौ कुरुताम्

प्रथमः समीरः

द्वितीयः समीरः

किं भवती कस्याश्चित् एतादृश्याः परिस्थितेः विषये चिन्तयितुं शक्नोति यदा भवती तया सार्धं मैत्रीं कृतवती या भवत्याः बहुभिन्ना अस्ति ? एतस्य वर्णनं एकस्याः कथायाः रूपेण करोतु ।



विभाजनस्य आधारः आसीत् यत् जनाः कीदृशानि कार्याणि कुर्वन्ति। जनाः यस्यां जातौ जन्म प्राप्नुवन्ति स्म तस्याः परिवर्तनं न कर्तुं शक्नुवन्ति स्म । उदाहरणार्थं यदि भवती कुम्भकारस्य कुले अभविष्यत् तदा भवती कुम्भकारी एव अभविष्यत् । कश्चिदपि जनः स्वजाति-सम्बद्ध-व्यवसायं न परिवर्तितुं शक्नोति स्म, अतः तत्सम्बद्धं ज्ञानम् अतिरिच्य सः अन्यविधं ज्ञानमपि अर्जयेत् इति आवश्यकं न मन्यते स्म । एतस्मात् कारणात् असमानता समुत्पन्ना । भवत्यः एतस्मिन् विषये अग्रिमेषु पाठेषु पठिष्यन्ति।

द्वितीयः समीरः विद्यालयं किमर्थं न गच्छति स्म? भवत्याः मतानुसारं यदि सः विद्यालयं गन्तुम् इच्छेत् तर्हि किं सः गन्तुं शक्येत्? किम् एतत् सत्यम् अस्ति यत् केचन बालकाः विद्यालयं गन्तुं शक्नुवन्ति केचन च न गन्तुं शक्नुवन्ति? एतस्मिन् विषये चर्चां कुर्वन्तु।

## विविधता अस्माकं जीवनं कथं समृद्धं करोति?

यथा प्रथमः समीरः द्वितीयः समीरः च मित्रे जाते तथैव भवत्याः अपि सख्यः स्युः याः भवत्याः बहु पृथक् स्युः। भवती प्रायः तासां गृहे भिन्नं भोजनं कृतवती स्यात्, ताभिः सार्धं पृथगोत्सवाः आचरिताः स्युः तासां वस्त्राणि धृतानि स्युः तथा च न्यूनाधिक्येन तासां भाषा अपि शिक्षिता स्यात्।



भवतीभ्यः प्रायः विभिन्नानां जन्तूनां राज्ञीनां साहसपूर्णघटनानां भूत-प्रेतादीनां च कथाः रुचिकराः प्रतीयेरन् । सम्भवतः स्वयं कथालेखने अपि भवतीनां रुचिः स्यात्। एतद् भवितुं शक्नोति यत् भवत्यः स्वयमपि कथारचनायां रुचिं दध्युः । कस्याश्चित् उत्तमकथायाः पठनेन सदैव प्रसन्नता लभ्यते। तां पठित्वा अन्याः नूतनाः कथाः रचयितुं विचाराः भवति। ये जनाः कथाः लिखन्ति ते जनाः विभिन्नेभ्यः स्रोतोभ्यः पुस्तकेभ्यः वास्तविकजीवनात् कल्पनातः च प्रेरणां प्राप्नुवन्ति।

सूचीं कुर्वन्तु यत् भवत्यः भारतस्य पृथक्-पृथक् प्रान्तानां कानि कानि व्यञ्जनानि आस्वादितवत्यः सन्ति। स्वकीयां मातृभाषाम् अतिरिच्य तासां भाषाणां सूचीं कुर्वन्तु यासां भवत्यः काञ्चन शब्दान् अपि जानन्ति।

चिन्तयतु भवती काचित् चित्रनिर्मात्री अथवा कथानिर्मात्री अस्ति याः अत्र निवसन्ति । एतादृशस्य स्थलस्य जीवनेन सम्बद्धां काचित् कथां लिखतु अथवा चित्रं निर्मातु। किं भवती चिन्तयति यत् एतादृशस्थलेषु निवासेन भवती आनन्दम् अनुभविष्यति ? तेषां पञ्चानां वस्तूनां सूचीं निर्मातु येषां न्यूनताम् एतादृशस्थलेषु भवती सर्वाधिकं अनुभविष्यति।

केचन जनाः जङ्गलेषु जन्तूनां मध्ये अतिष्ठन् तथा च ते जन्तूनां मैत्र्याः शत्रुतायाः च विषये कथाः लिखितवन्तः । कैश्चित् अन्यैः जनैः राज्ञां राज्ञीनां च वृत्तान्तं पठित्वा स्नेहस्य सम्मानस्य च कथाः लिखिताः । केचन स्वबाल्यकालस्य वृत्तान्तान् लिखितवन्तः तथा च विद्यालयकालस्य मित्राणां च संस्मरणानि साहसस्य च कथाः लिखिताः।

कल्पनां कुर्वन्तु यत् येषां कथाः भवत्यः श्रुतवत्यः अथवा पठितवत्यः सन्ति, ते सर्वे कथाकाराः कथाश्रावयितारः च एतादृशे स्थाने वस्तुं बाध्याः स्युः यत्र जनाः केवलं द्वयोः वर्णयोः वस्त्राणि धरेयुः यथा श्वेतवस्त्राणि रक्तवस्त्राणि च, तथा च एकप्रकारकमेव भोजनं खादेयुः (प्रायः आलुकानि!) समानरूपेण केवलं पशुपक्षीद्वयं पालयेयुः उदाहरणार्थं हिरणं काकं च । तथा च केवलं सर्पसोपानक्रीडया एव मनोरञ्जनं कुर्युः । एतादृशे स्थाने उषित्वा ते कीदृशीः कथाः लेखितुं शक्ष्यन्ति ?

**भारते विविधता**

भारतं विविधतानां देशः अस्ति। वयं विभिन्नाभिः भाषाभिः वदामः । विभिन्नप्रकारकं भोजनं कुर्मः

भारतस्य जनाः विविधैः उपायैः अधोलिखितानि कार्याणि कुर्वन्ति। अत्र एतेषु एकः उपायः दर्शितः अस्ति। उपायद्वयम् इतोऽपि लिखन्तु

| | | | |
|---|---|---|---|
| प्रार्थना | ईश्वरस्य भजनगानम् | | |
| विवाहकरणम् | | न्यायालयस्य सञ्चिकायां हस्ताक्षराङ्कनम् | |
| विभिन्नप्रकारकाणां वस्त्राणां धरणम् | | | मणिपुरे महिलानां फनैक-धरणम् |
| अभिवादनम् | | झारखण्डस्य आदिवासिनां परस्परं "जोहार" इति करणम् | |
| तण्डुलपाकः | मांस-शाक-प्रयोगाभ्यां च तण्डुल(बिरयानी)पाकः | | |

विभिन्नान् उत्सवान् आचरामः तथा च विभिन्नानां धर्माणां पालनं कुर्मः । परन्तु यदि गभीरतया वयं चिन्तयेम तर्हि वस्तुतः वयम् समान-प्रकारकाणि कार्याणि कुर्मः केवलम् अस्माकं कार्यसम्पादनस्य शैल्यः पृथक्-पृथक् सन्ति ।

**वयं विविधतां कथं अवगच्छेम ?**

प्रायः सपादद्विशतात् वर्षेभ्यः पूर्वं यदा रेलयानं बसयानं कारयानं च अस्माकं जीवनस्य भागभूतं न आसीत् तदा अपि जनाः संसारस्य एकस्मात् भागात् अपरभागं प्रति यात्रां कुर्वन्ति स्म । ते जलयानेषु अश्वेषु उष्ट्रेषु च उपविश्य अथवा पद्भ्यां गच्छन्ति स्म ।

प्रायः एताः यात्राः कृषिकार्याय वासार्थं च भूमेः अन्वेषणाय भवन्ति स्म अथवा व्यापारस्य कृते । परन्तु यात्रायां बहुकालः व्यतीतः भवति स्म अतः जनाः नूतने स्थाने प्रायः अधिककालपर्यन्तं तिष्ठन्ति स्म । एतत् अतिरिच्य अनावृष्टेः दुर्भिक्षस्य च कारणतः अपि वारं वारं जनाः स्वगृहं त्यजन्ति स्म । यदा उदरपूर्त्यर्थमपि भोजनं न लभ्यते स्म तदा ते नूतनं स्थानं गत्वा वसन्ति स्म । केचन जनाः कार्यस्य अन्वेषणार्थं केचन च युद्धस्य कारणात् गृहं त्यजन्ति स्म ।

यदा जनाः नूतनेषु स्थानेषु वस्तुम् आरभन्ते स्म तदा तेषां जीवने किञ्चित् परिवर्तनं भवति स्म । कानिचन प्रचलनानि ते नूतनस्य स्थानस्य स्वीकुर्वन्ति स्म । तथा च केषुचित् प्रचलनेषु ते पुरातनानाम् आचाराणाम् अनुसारं जीवनं यापयन्ति स्म । अनेन प्रकारेण तेषां भाषाभोजन-सङ्गीत-धर्मादिषु नूतनस्य पुरातनस्य च मिश्रणं भवति स्म । संस्कृतीनां च परस्परं आदानं प्रदानं च भवति स्म अनेन प्रकारेण शनैः शनैः काचित् मिश्रिता संस्कृतिः प्रादुर्भूता भवति स्म ।

यदि पृथक्-पृथक्-क्षेत्राणाम् इतिहासं पश्येम तर्हि ज्ञानं भविष्यति यत् कथं विभिन्न-सांस्कृतिक-प्रभावाः तत्रत्य-जीवन-संस्कृतिभ्यां स्वरूप-दाने योगदानं दत्तवन्तः । अनेन प्रकारेण



*लद्दाखः - उच्चपर्वतीयं मरुस्थलीयक्षेत्रम्*

बहूनि क्षेत्राणि स्वस्य विशिष्टस्य इतिहासस्य कारणात् विविधतासम्पन्नानि भवन्ति स्म ।

यथार्थतया अनेन एव प्रकारेण जनाः विभिन्नाभ्यः भौगोलिकस्थितिभ्यः कथं सामञ्जस्यं स्थापयन्ति, तस्मादपि विविधता उत्पद्यते । उदाहरणार्थं समुद्रस्य समीपे वासे तथा च पर्वतीयक्षेत्रेषु वासे महदन्तरम् भवति । न केवलं

तत्रत्यानां जनानां वस्त्रेषु खाद्यप्रवृतिषु एव अन्तरं भवति अपितु यादृशं कार्यं ते कुर्वन्ति तदपि पृथग्भवति। नगरेषु प्रायः जनाः एतद् विस्मरन्ति यत् तेषां जीवनं तेषां भौतिक-वातावरणेन कथं गभीरतया



*कौशेयप्रावारकस्य वयनं कुर्वती काचित् महिला*

सम्बद्धमस्ति। इत्थं एतस्मात् कारणाद् अस्ति यतोहि नगरेषु जनाः विरलाः एव स्वस्मै शाकानि अन्नानि च उत्पादयन्ति। ते एतादृशानां वस्तूनां कृते विपण्याः उपरि एव आश्रिताः भवन्ति।

आगच्छन्तु भारतस्य द्वयोः भागयोः लद्दाखकेरलयोः उदाहरणस्य माध्यमेन इदं ज्ञातुं प्रयत्नं कुर्मः यत् कस्यचित् क्षेत्रस्य विविधतायां तस्य ऐतिहासिक-भौगोलिक-कारकाणां कीदृशः प्रभावः भवति।

मानचित्रे भारतस्य चित्रं पश्यन्तु तथा च तस्मिन् अन्वेषयन्तु यत् एते द्वे क्षेत्रे – लद्दाखः केरलं च कुत्र स्तः। एतयोः क्षेत्रयोः भौगोलिक-परिस्थितयः भोजनं वस्त्राणि च कथं व्यवसायं प्रभावयन्ति ? तासां सूचीं कुर्वन्तु।

**लद्दाखः** जम्मूकश्मीरयोः पूर्वीभागे उपत्यकासु निहीतं किञ्चित् मरुस्थलीयक्षेत्रमस्ति। अत्र अत्यल्पमेव कृषिकार्यं सम्भवति यतोहि अस्मिन् क्षेत्रे वृष्टिः किञ्चिदपि न भवति इदं क्षेत्रं प्रतिवर्षं चिरकालं यावत् हिमाच्छादितं भवति। अस्मिन् क्षेत्रे न्यूनाः एव वनवस्पतयः प्ररोहन्ति। पानीयस्य जलस्य कृते जनाः औष्ण्यकारणात् यत् हिमं द्रवीभावं गच्छति तदुपरि एव आश्रिताः भवन्ति।

अत्रत्याः जनाः काञ्चित् विशिष्टप्रकारकां अविं पालयन्ति यस्याः "पश्मीना" इति नामकस्य उत्तम-ऊर्णस्य प्राप्तिः भवति। इयम् ऊर्णा बहुमूल्या अस्ति अतः एतन्निर्मितं राङ्कवं मूल्यवत् भवति। लद्दाखस्य जनाः सावधानतया एतस्याः उर्णायाः सङ्ग्रहणं कृत्वा काश्मीरस्य व्यापारिभ्यः विक्रीणन्ते। मुख्यतः काश्मीरेषु एव पश्मीना-राङ्कवाणि वयन्ते। अत्रत्याः जनाः दौग्धिकपदार्थानां यथा नवनीतस्य, चीज इत्यस्य मांसस्य च भक्षणं कुर्वन्ति। प्रत्येकं परिवारस्य पार्श्वे काश्चन गावः अजाः चमरगावः (हिमगावः) च भवन्ति।

मरुस्थलस्य अयमर्थः नास्ति यत् व्यापारिणः अत्रागन्तुम् आकर्षिताः न अभवन्। लद्दाखः तु व्यापारस्य कृते सुमार्गः इति मतः यतोहि अत्र अनेकाः उपत्यकाः सन्ति यतः गत्वा मध्येशियायाः सार्थाः तस्मिन् क्षेत्रे प्राप्नुवन्ति स्म यस्य नाम अद्य तिब्बतः अस्ति एते सार्थाः आत्मना सह उपस्करान् असिद्धकौशेयं कटादीन् च स्वीकृत्य चलन्ति स्म।

लद्दाखमार्गेण एव बौद्धधर्मः तिब्बतं प्राप्तवान्। लद्दाखं लघुतिब्बतः इत्यपि कथयन्ति।

प्रायः चतुःशतात् वर्षेभ्यः प्राक् अत्र जनानां इस्लामधर्मेण सह परिचयः जातः तथा च अधुना अत्र व्यापकसङ्ख्यायां मुस्लिमाः एव सन्ति । लद्दाखे गीतानां कवितानां च सुसमृद्धः मौखिकसङ्ग्रहः अस्ति । तिब्बतस्य ग्रंथः केसरसागा लद्दाखे अतीव प्रचलितः अस्ति । तस्य स्थानीयरूपं मुस्लिमाः बौद्धाः च गायन्ति तथा च तस्याधारेण नाटकस्य मञ्चनं कुर्वन्ति ।

**केरलं** भारतस्य दक्षिण-पश्चिम-कोणे स्थितं राज्यम् अस्ति । इदं एकतः समुद्रावृत्तमस्ति तथा च अपरतः उपत्यकाभिः आवृत्तम् अस्ति । एतासु उपत्यकासु विविधप्रकारस्य उपस्कराः यथा कृष्णमरीचिका-लवङ्ग-इलादयः प्ररोहयन्ति । एतेषाम् उपस्कराणां कारणतः इदं क्षेत्रं व्यापारिणां कृते अतीव आकर्षकं जातम् ।

आदौ अरबी-यहूदीव्यापारिणः केरलम् आगतवन्तः । एषा अपि मान्यता अस्ति यत् ईसामसीहस्य धर्मदूतः संतथामसः प्रायः द्विसहस्रवर्षेभ्यः पूर्वं अत्र आगतवान् । भारते ईसाईधर्मस्य आनयनस्य श्रेयः अपि तस्मै गच्छति । अरबतः आगत्य बहवः व्यापारिणः अत्र उषितवन्तः । इब्नबतूताः यः प्रायः सप्तशतवर्षेभ्यः पूर्वमत्र आगतवान्, स्वयात्रावृत्तान्ते मुसलमानानां जीवनचरित्रस्य विवरणदानस्य काले सः लिखितवान् यत् मुस्लिमसमुदायस्य अत्र महान् आदरः आसीत् ।

वास्कोडिगामा जलयानेन अत्र प्राप्तवान् तदा पुर्तगालवासिनः यूरोपतः भारतस्य समुद्रमार्गं ज्ञातवन्तः । एतेषां सर्वेषां प्रभावाणां कारणतः केरलस्य जनाः विभिन्नानां धर्माणां पालनं कुर्वन्ति येषु यहूदी-ईसाई-हिन्दु-इस्लाम-बौद्धधर्माः च सम्मिलिताः सन्ति ।





केरले आयोज्यमानस्य ओणमपर्वणः कश्चित् विशिष्टाकर्षणम्- नौः प्रतियोगिता



*मत्स्यग्राहिचीन-देशीय-जालम्*

चीनस्य व्यापारिणः अपि केरलम् आगतवन्तः । अत्र मत्स्यग्रहणार्थं ये जालाः प्रयुज्यन्ते स्म ते चीनस्यजालैः इव साक्षात् साम्यतां भजन्ते स्म ते च "चीनी-वला" इति कथ्यन्ते । भर्जनस्य कृते जनाः येषां पात्राणां प्रयोगं कुर्वन्ति ते "चीना-चट्टी" इति उच्यन्ते । तस्मिन् "चीन" शब्दः एतत् तथ्यं प्रति सङ्केतयति यत् तस्य उत्पत्तिः कुत्र जाता स्यात् । केरलस्य उर्वराभूमिः जलवायुः च तण्डुलसस्यस्य कृते अतीव उपयुक्तः अस्ति तत्रत्याः च अधिकाः जनाः मत्स्यान् शाकान् ओदनं च खादन्ति ।

यथा केरललद्दाखयोः भौगोलिकस्थितयः परस्परं सर्वथा पृथक् सन्ति तथैव वयम् इदमपि पश्यामः यत् द्वयोः क्षेत्रयोः इतिहासे समानप्रकारकाः सांस्कृतिकप्रभावाः सन्ति । द्वे क्षेत्रे एव चीनारबदेशीयैः व्यापारिभिः प्रभाविते । यथा केरलस्य भौगोलिकस्थितयः उपस्कराणां कृषिं सम्भवां कृतवत्यः तथैव लद्दाखस्य विशेषभौगोलिकस्थित्या उर्णया च व्यापारिणः स्वं प्रति आकृष्टाः । अनेन प्रकारेण ज्ञायते यत् कस्यापि क्षेत्रस्य सांस्कृतिकजीवनस्य तस्य इतिहासेन भूगोलेन च सह घनिष्ठः सम्बन्धः भवति ।

विविधसंस्कृतीनां प्रभावः केवलं अतीतस्य समयस्य वार्ता नास्ति । अस्माकं वर्तमानजीवनस्य आधारः एव कार्यार्थं एकस्मात् स्थानात् अपरं स्थानं प्रति गमनम् अस्ति । प्रत्येकं कार्येण सह अस्माकं सांस्कृतिक-लोकाचारस्य जीवनयापनस्य च शैली शनैः शनैः तस्य नूतनस्य क्षेत्रस्य भागभूता जायते यत्र वयं प्राप्नुमः । तथैव स्वप्रतिवेशे वयं पृथक्-पृथक् समुदायस्य जनैः सह निवसामः । वयं स्वदैनन्दिनजीवने परस्परं मिलित्वा कार्यं कुर्मः तथा च अन्योऽन्येषां लोकाचारेषु परम्परासु च सहभागिनः भवामः ।

## विविधतायाम् एकता

भारतस्य विविधता अनेकता च तस्य शक्तेः श्रोतः इति स्वीकृतः । यदा भारते आङ्गल-शासनम् आसीत् तदा विभिन्न-धर्म-भाषा-क्षेत्रस्य महिलाः पुरुषाः च आङ्ग्लीयान् विरुध्य अयुध्यन्त । भारतस्य स्वतन्त्रता-सङ्ग्रामे विभिन्न-परिवेशानां जनाः सम्मिलिताः आसन् । ते एकत्रीभूय आन्दोलनं कृतवन्तः, सम्भूय कारागारं गतवन्तः तथा च आङ्गलीयानां विभिन्नप्रकारेण विरोधं कृतवन्तः । आङ्ग्लीयाः चिन्तितवन्तः आसन् यत् ते भारतस्य जनेषु परस्परं सङ्घर्षम् उत्पादयितुं शक्नुवन्ति यतोहि तेषु महत्यः विविधताः सन्ति अपि च अनेन प्रकारेण तेषां शासनं चिरकालं यावत् चलिष्यति । परन्तु जनाः दर्शितवन्तः यत् ते परस्परं कियन्तः अपि विभिन्नता-सम्पन्नाः भवेयुः परन्तु आङ्ग्लीयैः सार्धं यः सङ्घर्षः वर्त्तते तस्मिन् ते सम्भूताः सन्ति ।

---

रक्तमयानि दिनानि, अस्माकं न विस्मर्तव्यानि

स्वप्रसन्नतासु अश्रूणि, अस्माभिः निपातयितव्यानि।
सैयादः अस्माकं, चित्वा चित्वा पुष्पाणि त्रोटितानि
वासशून्ये स्थाने अस्मिन्, कश्चित् पुष्पगुच्छः विकासस्य गमनीयम्
गुलिकां खादित्वा अशेवहि जलियांबागे वयम्
शून्ये प्रेतभूमौ दीपकं प्रज्वाल्य गन्तव्यम्
हिन्दुमुस्लिमानां भवति अधुना होली
प्रवहन्ति एकस्मिन् वर्णे, वस्त्राञ्चलं आर्द्रीकृत्य गन्तव्यम्
केचन कारागारे सन्ति केचन च प्रेतभूमौ निपातिताः
बिन्दुद्वयं अश्रूणि तेषु निपात्य गमनीयम्
रक्तमयानि दिनानि अस्माकं....

भारतीय-जन-नाट्यसंघः(इप्टा)

इदं गीतं जलियाँवाला-बाग-हत्या-काण्डस्य अनन्तरम् अमृतसरे गीतम् आसीत् । एतस्मिन् हत्याकाण्डे कश्चित् ब्रिटिशजनरलः तान् शान्तिप्रियान् शस्त्रविहीनान् गुलिकया प्रहृतवान् आसीत् ये सम्भूय तत्र सभां कुर्वन्ति स्म। अस्मिन् प्रकरणे बहवः जनाः मृताः ततोऽप्यधिकाः व्रणिताः जाताः । सिक्खजनाः हिन्दवः मुस्लिमाः महिलाः पुरुषाः अपि च अन्ये बहवः जनाः आसन् ये आङ्गलीयानां पक्षपात-पूर्णायाः नीतेः विरोधं कर्तुं तत्र समवेताः आसन्। इदं गीतं तेषाम् एव हुतात्मनां स्मरणार्थं गीयते स्म।

स्वतन्त्रता-सङ्ग्रामस्य काले प्रादुर्भूतानि गीतानि चिह्नानि च विविधतां प्रति अस्माकं विश्वासं दृढीकुर्वन्ति। किं भवत्यः भारतीयस्य ध्वजस्य कथां जानन्ति ? स्वतन्त्रता-सङ्ग्रामस्य काले एव भारतीयस्य ध्वजस्य परिकल्पना कृता आसीत् एतस्य ध्वजस्य प्रयोगं जनाः सम्पूर्णे भारते आङ्ग्लीयानां विरोधार्थं कृतवन्तः आसन्।

जवाहर-लाल-नेहरूद्वारा स्वपुस्तके “भारत की खोज” इत्यस्मिन् लिखितमस्ति यत् भारतीयैकता केनचित् बहिर्भागात् न आरोपिता



*स्वतन्त्रतादिवसस्य उपलक्ष्ये भाषमाणः पंडितनेहरूः*

अपितु “इयम् अतिगभीरा वर्तते यस्यां विभिन्नाः विश्वासाः प्रथाः च स्वीकृताः सन्ति । एतस्यां एकतायां विविधतायाः परिचयः प्रोत्साहनं च भवति” । सः नेहरूः एव आसीत् यः भारतस्य विविधतायाः वर्णनं कुर्वन् “अनेकतायाम् एकता” इति विचारं प्रतिपादितवान् ।

रविन्द्रनाथटैगोरद्वारा रचितमस्माकं राष्ट्रगानमपि भारतीयैकतायाः एव काचित् अभिव्यक्तिः अस्ति । राष्ट्रगानं कथम् एकतायाः वर्णनं करोति स्वशब्दैः लिखन्तु ।

## अभ्यासः

१. स्वक्षेत्रे आयोज्यमानाम् उत्सवानां सूचीं कुर्वन्तु । एतेषु के उत्सवाः सर्वैः समुदायैः आचर्यन्ते ?
२. भवतां विचारेण भारतस्य समृद्धविविधसंस्कृतिः भवतां जीवनं कथं सम्यक् करोति ।
३. भवताम् अनुसारं “ अनेकतायाम् एकता” इति विचारः भारतस्य कृते कथम् उपयुक्तः अस्ति ? भारत की खोज इति पुस्तकात् स्वीकृतेषु वाक्यांशेषु नेहरूः भारतस्य ऐक्यस्य विषये किं वक्तुम् इच्छति?
४. जलियाँवाला-बाग-हत्या-काण्डस्य विषये लिखितस्य गीतस्य तां पङ्क्तिं चिन्वन्तु या भवताम् अनुसारं भारतस्य एकतां निश्चयेन प्रदर्शयति ।
५. लद्दाखकेरलयोः इव भारतस्य किञ्चित् क्षेत्रं चिन्वन्तु तथा च अध्ययनं कुर्वन्तु यत् कथं तस्य क्षेत्रस्य विविधता ऐतिहासिक-भौगोलिक-कारकैः प्रभाविता अस्ति । किम् एतानि ऐतिहासिकानि भौगोलिकानि च कारकाणि परस्परं सम्बद्धानि सन्ति ? कथम् ?

इति प्रथमोऽध्यायः